# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New&Old)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.E.3.5.9** | समयः- 3 तः 6पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधस्तनेषु श्लोकेषु द्वयोः व्याख्यानं विधेयम्।** १०

१ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्॥

२ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत्।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम्॥

३ बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ परब्रह्मभूतपरमपुरुषस्य स्वरूपं पाठ्यग्रन्थदिशा प्रतिपादयत।

२ मायास्वरूपं विविच्य तद्विमोचनोपायं यथाग्रन्थं प्रतिपादयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनेषु श्लोकेषु द्वयोः व्याख्यानं विधेयम्।** १०

१ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥

२ ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥

३ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुनः।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत । १०**

१ ज्ञानिनो भगवदुपासनं भगवत्प्राप्तिप्रकारं च यथाग्रन्थं विवेचयत।

२ अष्टमाध्यायस्य सारांशं लिखत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कयोश्चिद् द्वयोः प्रश्नयोः व्याख्यात्मकमुत्तरं प्रदेयम्। १०**

१ प्राप्यभूतस्य परमपुरुषस्याचिन्त्यमहिमानं सविशदं प्रतिपादयत।

२ भगवदनुभवैकभोगानां ज्ञानिनां महात्मनां स्वभावाचरणवर्णनं विधेयम्।

३ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥ श्लोकमिमं विशदयत।

**प्रश्न ६ कस्यचिदेकस्य उत्तरं लिखत। १०**

१ नवमाध्यायस्य सारांश लिखत।

२ भक्तिरूपस्योपासनस्य स्वरूपं प्रतिपादयत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत। १०**

१ यततामपि सिद्धानां कश्चित् तत्त्वतः कं वेत्ति ?

२ अपरा प्रकृतिः कतिविधा? का च सा?

३ कः कार्यावस्थायां कारणावस्थायां च सर्वशरीरतया सर्वप्रकारः अवस्थितः?

४ चतुर्विधाः सुकृतिनो के सन्ति?

५ सप्तमाध्याये कति श्लोकाः सन्ति?

६ कीदृशाः महात्मानः पुनर्जन्म नाप्नुवन्ति?

७ एकया कया गत्याऽनावृत्तिं याति?

८ वेदाः कति सन्ति? के च ते?

९ अष्टमाध्याये कति श्लोकास्सन्ति?

१० अक्षरब्रह्मयोगः कस्मिन्नध्याये वर्णितः?

११ चेतनाचेतनात्मकं किम्?

१२ परमात्मा कल्पादौ किं विसृजति?

१३ क्षीणे पुण्ये ते कुत्र विशंति?

१४ जगतः कारणं किम्?

१५ कः उपास्यः पूज्यश्च?